असाधारणव्यवहारमातृकाप्रकरणम्

अभियोगं अनिस्तीर्य नैनं प्रत्यभियोजयेत् ।
अभियुक्तं च नान्येन नोक्तं विप्रकृतिं नयेत् ।। २.९ ।।

कुर्यात्प्रत्यभियोगं च कलहे साहसेषु च ।
उभयोः प्रतिभूर्ग्राह्यः समर्थः कार्यनिर्णये ।। २.१० ।।

निह्नवे भावितो दद्याद्धनं राज्ञे च तत्समम् ।
मिथ्याभियोगी द्विगुणं अभियोगाद्धनं वहेत् ।। २.११ ।।

साहसस्तेयपारुष्य गोऽभिशापात्यये स्त्रियाम् ।
विवादयेत्सद्य एव कालोऽन्यत्रेच्छया स्मृतः ।। २.१२ ।।

देशाद्देशान्तरं याति सृक्किणी परिलेढि च ।
ललाटं स्विद्यते चास्य मुखं वैवर्ण्यं एति च ।। २.१३ ।।

परिशुष्यत्स्खलद्वाक्यो विरुद्धं बहु भाषिते ।
वाक्चक्षुः पूजयति नो तथौष्ठौ निर्भुजत्यपि ।। २.१४ ।।

स्वभावाद्विकृतिं गच्छेन्मनोवाक्कायकर्मभिः ।
अभियोगेऽथ साक्ष्ये वा दुष्टः स परिकीर्तितः ।। २.१५ ।।

संदिग्धार्थं स्वतन्त्रो यः साधयेद्यश्च निष्पतेत् ।
न चाहूतो वदेत्किंचिद्धीनो दण्ड्यश्च स स्मृतः ।। २.१६ ।।

साक्षिषूभयतः सत्सु साक्षिणः पूर्ववादिनः ।
पूर्वपक्षेऽधरीभूते भवन्त्युत्तरवादिनः ।। २.१७ ।।

सपणश्चेद्विवादः स्यात्तत्र हीनं तु दापयेत् ।
दण्डं च स्वपणं चैव धनिने धनं एव च ।। २.१८ ।।

छलं निरस्य भूतेन व्यवहारान्नयेन्नृपः ।
भूतं अप्यनुपन्यस्तं हीयते व्यवहारतः ।। २.१९ ।।

निह्नुते लिखितं नैकं एकदेशे विभावितः ।
दाप्यः सर्वं नृपेणार्थं न ग्राह्यस्त्वनिवेदितः ।। २.२० ।।

स्मृत्योर्विरोधे न्यायस्तु बलवान्व्यवहारतः ।
अर्थशास्त्रात्तु बलवद्धर्मशास्त्रं इति स्थितिः ।। २.२१ ।।

प्रमाणं लिखितं भुक्तिः साक्षिणश्चेति कीर्तितम् ।
एषां अन्यतमाभावे दिव्यान्यतमं उच्यते ।। २.२२ ।।

सर्वेष्वर्थविवादेषु बलवत्युत्तराक्रिया ।
आधौ प्रतिग्रहे क्रीते पूर्वा तु बलवत्तरा ।। २.२३ ।।

पश्यतोऽब्रुवतो भूमेर्हानिर्विंशतिवार्षिकी ।
परेण भुज्यमानाया धनस्य दशवार्षिकी ।। २.२४ ।।

आधिसीमोपनिक्षेप जडबालधनैर्विना ।
तथोपनिधिराजस्त्री श्रोत्रियाणां धनैरपि ।। २.२५ ।।

आध्यादीनां विहर्तारं धनिने दापयेद्धनम् ।
दण्डं च तत्समं राज्ञे शक्त्यपेक्षं अथापि वा ।। २.२६ ।।

आगमोऽभ्यधिको भोगाद्विना पूर्वक्रमागतात् ।
आगमेऽपि बलं नैव भुक्तिः स्तोकापि यत्र नो ।। २.२७ ।।

आगमस्तु कृतो येन सोऽभियुक्तस्तं उद्धरेत् ।
न तत्सुतस्तत्सुतो वा भुक्तिस्तत्र गरीयसी ।। २.२८ ।।

योऽभियुक्तः परेतः स्यात्तस्य रिक्थी तं उद्धरेत् ।
न तत्र कारणं भुक्तिरागमेन विनाकृता ।। २.२९ ।।

नृपेणाधिकृताः पूगाः श्रेणयोऽथ कुलानि च ।
पूर्वं पूर्वं गुरु ज्ञेयं व्यवहारविधौ नृणाम् ।। २.३० ।।

बलोपाधिविनिर्वृत्तान्व्यवहारान्निवर्तयेत् ।
स्त्रीनक्तमन्तरागार बहिःशत्रुकृतांस्तथा ।। २.३१ ।।

मत्तोन्मत्तार्तव्यसनि बालभीतादियोजितः ।
असंबद्धकृतश्चैव व्यवहारो न सिध्यति ।। २.३२ ।।

प्रनष्टाधिगतं देयं नृपेण धनिने धनम् ।
विभावयेन्न चेल्लिङ्गैस्तत्समं दण्डं अर्हति ।। २.३३ ।।

राजा लब्ध्वा निधिं दद्याद्द्विजेभ्योऽर्धं द्विजः पुनः ।
विद्वानशेषं आदद्यात्स सर्वस्य प्रभुर्यतः ।। २.३४ ।।

इतरेण निधौ लब्धे राजा षष्ठांशं आहरेत् ।
अनिवेदितविज्ञातो दाप्यस्तं दण्डं एव च ।। २.३५ ।।

देयं चौरहृतं द्रव्यं राज्ञा जानपदाय तु ।
अददद्धि समाप्नोति किल्बिषं यस्य तस्य तत् ।। २.३६ ।।

"https://sa.wikisource.org/w/index.php?title=असाधारणव्यवहारमातृकाप्रकरणम्&oldid=41012" इत्यस्माद् पुनः प्राप्तिः

- २३ अक्तूबर २०१५ (तमे) दिनाङ्के अन्तिमसम्पादनं १०:११ समये अभवत्
- पाठः क्रियेटिव कॉमन्स ऐट्रिब्यूशन/शेयर-अलाइक अभिज्ञापत्रस्य अन्तर्गततया उपलब्धः अस्ति; अन्याः संस्थित्यः अपि सन्ति । अधिकं ज्ञातुम् अत्र उपयोगस्य संस्थितिं पश्यतु ।